अध्याय 6: मनःपूतं समाचरेत्

विषय-सूची

9 प्रश्नावली · 50 प्रश्न

प्रश्नावली 1	अधः प्रदत्तानां प्रश्नानां पूर्णवाक्येन उत्तरं लिखत-	7 प्रश्न
प्रश्नावली 2	अधोलिखितेषु श्लोकांशेषु रिक्तस्थानानि पूरयत-	5 प्रश्न
प्रश्नावली 3	रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत-	6 प्रश्न
प्रश्नावली 4	अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत- (दृष्टिपूतं न्यसेत् पादं वस्त्रपूतं जलं पिबेत् । सत्यपूतां वदेत् वाचं मनः पूतं समाचरेत् ॥)	11 प्रश्न
प्रश्नावली 5	मञ्जूषातः पदानि चित्वा भावार्थेषु रिक्तस्थानानि पूरयत- (बुद्धिः, लक्ष्यं, पुरुषस्य, अभिप्राय, धीराः, नूतनम्)	2 प्रश्न
प्रश्नावली 6	श्लोकानाम् अन्वयेषु रिक्तस्थानानि पूरयत-	2 प्रश्न
प्रश्नावली 7	यथोचितं मेलनं कुरुत- (श्लोकांशः – स्त्रोतोग्रन्थः)	5 प्रश्न
प्रश्नावली 8	रेखाङ्कितेषु पदेषु सन्धिविच्छेदं कुरुत- (यथा-यो बहून्यपि साधयेत्। बहूनि + अपि)	7 प्रश्न
प्रश्नावली 9	अत्र कतिचन विग्रहवाक्यानि दत्तानि सन्ति । तेषां समस्तपदानि पाठात् चित्वा लिखत- (यथा – मनसा पूतं समाचरेत् । मनःपूतम्)	5 प्रश्न

प्रश्नावली 1 — अधः प्रदत्तानां प्रश्नानां पूर्णवाक्येन उत्तरं लिखत-

प्रश्न 1

(क) लोकः कस्य आचरणम् अनुकरोति ?

हल

उत्तर: लोक: श्रेष्ठजनस्य आचरणम् अनुकरोति ।

प्रश्न 2

(ख) कीदृशी वाणी वक्तव्या?

हल

उत्तर: सत्यपूतां वाणी वक्तव्या ।

प्रश्न 3

(ग) लक्ष्मीः कम् उपैति ?

हल

उत्तर: लक्ष्मी उद्योगिनं पुरुषसिंहम् उपैति।

प्रश्न 4

(घ) उत्तमजनाः कार्यं प्रारभ्य किं न कुर्वन्ति ?

हल

उत्तर: उत्तमजनाः कार्यं प्रारभ्य विघ्नैः पुनः पुनः अपि प्रतिहन्यमानाः कार्यं न परित्यजन्ति ।

प्रश्न 5

(ङ) धर्मस्य लक्षणानि कानि ?

हल

उत्तर: धृतिः, क्षमा, दमः, अस्तेयं शौचम्, इन्द्रियनिग्रहः, धीः, विद्या, सत्यम्, अक्रोधः च धर्मस्य दश लक्षणानि सन्ति ।

प्रश्न 6

(च) सकलाः कलाः कस्मात् सिध्यन्ति ?

हल

उत्तर: सकलाः कलाः अभ्यासात् सिध्यन्ति ।

प्रश्न 7

(छ) सम्पदः कं वृणते ?

हल

उत्तर: सम्पदः विमृश्यकारिणं वृणते ।

प्रश्नावली 2 — अधोलिखितेषु श्लोकांशेषु रिक्तस्थानानि पूरयत-

प्रश्न 1

(क) ..... परमापदां पदम्।

हल

उत्तर: सहसा विदधीत न क्रियामविवेकः

प्रश्न 2

(ख) सन्तः ..... अन्यतरद् भजन्ते।

हल

उत्तर: परीक्ष्य

प्रश्न 3

(ग) दैवं निहत्य कुरु ..... आत्मशक्त्या ।

हल

उत्तर: पौरुषम्

प्रश्न 4

(घ) स यत् ..... कुरुते ।

हल

उत्तर: प्रमाणं

प्रश्न 5

(ङ) धीर्विद्या सत्यमक्रोधो ..... धर्मलक्षणम्।

हल

उत्तर: दशकं

प्रश्नावली 3 — रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत-

प्रश्न 1

(क) नीचैः विघ्नभयेन कार्यं न प्रारभ्यते ।

हल

उत्तर: कैः विघ्नभयेन कार्यं न प्रारभ्यते ?

प्रश्न 2

(ख) सकलाः कलाः अभ्यासात् सिध्यन्ति ।

हल

उत्तर: सकलाः कलाः कथम् / कस्मात् सिध्यन्ति ?

प्रश्न 3

(ग) वस्त्रपूतं जलं पिबेत् ।

हल

उत्तर: कीदृशं जलं पिबेत् ?

प्रश्न 4

(घ) लक्ष्मीः पुरुषसिंहम् उपैति।

हल

उत्तर: लक्ष्मीः कम् उपैति ?

प्रश्न 5

(ङ) सन्तः परीक्ष्य अन्यतरद् भजन्ते ।

हल

उत्तर: के परीक्ष्य अन्यतरद् भजन्ते ?

प्रश्न 6

(च) क्रियां सहसा न विदधीत ।

हल

उत्तर: कां सहसा न विदधीत ?

प्रश्नावली 4 — अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत- (दृष्टिपूतं न्यसेत् पादं वस्त्रपूतं जलं पिबेत् । सत्यपूतां वदेत् वाचं मनः पूतं समाचरेत् ॥)

प्रश्न 1

(क) अस्मिन् श्लोके प्रथमं क्रियापदं किम् ?

हल

उत्तर: न्यसेत्।

प्रश्न 2

(ख) कं न्यसेत् ?

हल

उत्तर: पादं न्यसेत्।

प्रश्न 3

(ग) कीदृशं पादं न्यसेत् ?

हल

उत्तर: दृष्टिपूतं पादं न्यसेत् ।

प्रश्न 4

(घ) द्वितीयं किं क्रियापदम् अस्ति ?

हल

उत्तर: पिबेत्

प्रश्न 5

(ङ) किं पिबेत् ?

हल

उत्तर: जलं पिबेत्।

प्रश्न 6

(च) कीदृशं जलं पिबेत् ?

हल

उत्तर: वस्त्रपूतं जलं पिबेत् ।

प्रश्न 7

(छ) तृतीयं किं क्रियापदम् अस्ति ?

हल

उत्तर: वदेत्।

प्रश्न 8

(ज) कां वदेत्?

हल

उत्तर: वाचम् वदेत्।

प्रश्न 9

(झ) कीदृशीं वाणीं वदेत् ?

हल

उत्तर: सत्यपूतां वाणीं वदेत् ।

प्रश्न 10

(ञ) चतुर्थं किं क्रियापदम् अस्ति ?

हल

उत्तर: समाचरेत्।

प्रश्न 11

(ट) मनः किं समाचरेत् ?

हल

उत्तर: मनःपूतं समाचरेत्।

प्रश्नावली 5 — मञ्जूषातः पदानि चित्वा भावार्थेषु रिक्तस्थानानि पूरयत- (बुद्धिः, लक्ष्यं, पुरुषस्य, अभिप्राय, धीराः, नूतनम्)

प्रश्न 1

(क) लक्ष्मीः प्रयत्नशीलस्य पराक्रमिणः ..... समीपं स्वयम् आगच्छति। कापुरुषाः तु 'विधिः एव बलीयान्' इति वदन्ति । ये पौरुषेण परिस्थितिम् अतिक्रम्य कार्याणि साधयन्ति ते एव .....। प्रयत्नं कृत्वा अपि यदि ..... न प्राप्तं तर्हि तत्र दोषः नास्ति खलु।

हल

उत्तर: पुरुषस्य, धीराः, लक्ष्यं ।

प्रश्न 2

(ख) पुरातनम् अस्ति इति कारणेन किमपि वस्तु तत्त्वं व्यक्तित्वं वा समीचीनं भवेदेव इति नियमः नास्ति । तथैव ..... अस्ति इति कारणेन दोषरहितं भवेत् इत्यपि नियमः नास्ति । येषां ..... पक्वा अस्ति ते परीक्षण-निरीक्षणानन्तरम् एव उत्तमं स्वीकुर्वन्ति । किन्तु अज्ञानाः अन्येषाम् ..... श्रुत्वा तदनुसारेण प्रवर्तन्ते ।

हल

उत्तर: नूतनं, बुद्धिः, अभिप्राय ।

प्रश्नावली 6 — श्लोकानाम् अन्वयेषु रिक्तस्थानानि पूरयत-

प्रश्न 1

(क) सर्वा: ..... अभ्यासेन (सिध्यन्ति) । ..... कलाः अभ्यासात् (सिध्यन्ति) । ध्यानमौनादि (अपि) ..... (सिध्यति) । अभ्यासस्य ..... किम् (अस्ति) ?

हल

उत्तर: क्रियाः सकलाः, अभ्यासात्, दुष्करम् ।

प्रश्न 2

(ख) श्रेष्ठः यत् यत् ..... इतरः जनः तत् तत् एव (आचरति) । सः यत् ..... कुरुते, लोकः तत् .....।

हल

उत्तर: आचरति, प्रमाणं, अनुवर्तते ।

प्रश्नावली 7 — यथोचितं मेलनं कुरुत- (श्लोकांशः – स्त्रोतोग्रन्थः)

प्रश्न 1

(क) पुराणमित्येव न साधु सर्वम् — (१. मनुस्मृतिः / २. पञ्चतन्त्रम् / ३. नीतिशतकम् / ४. मालविकाग्निमित्रम् / ५. श्रीमद्भगवद्गीता)

हल

उत्तर: (क) पुराणमित्येव न साधु सर्वम् – मालविकाग्निमित्रम्

प्रश्न 2

(ख) प्रारभ्य चोत्तमजना: न परित्यजन्ति — (१. मनुस्मृतिः / २. पञ्चतन्त्रम् / ३. नीतिशतकम् / ४. मालविकाग्निमित्रम् / ५. श्रीमद्भगवद्गीता)

हल

उत्तर: (ख) प्रारभ्य चोत्तमजनाः न परित्यजन्ति – नीतिशतकम्

प्रश्न 3

(ग) यद्यदाचरति श्रेष्ठः — (१. मनुस्मृतिः / २. पञ्चतन्त्रम् / ३. नीतिशतकम् / ४. मालविकाग्निमित्रम् / ५. श्रीमद्भगवद्गीता)

हल

उत्तर: (ग) यद्यदाचरति श्रेष्ठः – श्रीमद्भगवद्गीता

प्रश्न 4

(घ) धृतिः क्षमा दमोऽस्तेयम् — (१. मनुस्मृतिः / २. पञ्चतन्त्रम् / ३. नीतिशतकम् / ४. मालविकाग्निमित्रम् / ५. श्रीमद्भगवद्गीता)

हल

उत्तर: (घ) धृतिः क्षमा दमोऽस्तेयम् – मनुस्मृतिः

प्रश्न 5

(ङ) उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी: — (१. मनुस्मृतिः / २. पञ्चतन्त्रम् / ३. नीतिशतकम् / ४. मालविकाग्निमित्रम् / ५. श्रीमद्भगवद्गीता)

हल

उत्तर: (ङ) उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी: – पञ्चतन्त्रम्

प्रश्नावली 8 — रेखाङ्कितेषु पदेषु सन्धिविच्छेदं कुरुत- (यथा-यो बहून्यपि साधयेत्। बहूनि + अपि)

प्रश्न 1

(क) धृतिः क्षमा दमोऽस्तेयम्।

हल

उत्तर: दम: + अस्तेयम्

प्रश्न 2

(ख) पुराणमित्येव न साधु सर्वम् ।

हल

उत्तर: पुराणम् + इति + एव

प्रश्न 3

(ग) विघ्नैः पुनरपि प्रतिहन्यमानाः ।

हल

उत्तर: पुन: + अपि

प्रश्न 4

(घ) प्रारभ्य चोत्तमजनाः न परित्यजन्ति।

हल

उत्तर: च + उत्तमजनाः

प्रश्न 5

(ङ) विघ्नविहता विरमन्ति मध्याः ।

हल

उत्तर: विघ्न + विहता

प्रश्न 6

(च) लोकस्तदनुवर्तते।

हल

उत्तर: लोक: + तत् + अनुवर्तते

प्रश्न 7

(छ) सन्तः परीक्ष्यान्यतरद्भजन्ते।

हल

उत्तरः परीक्ष्य + अन्यतरत् + भजन्ते

प्रश्नावली 9 — अत्र कतिचन विग्रहवाक्यानि दत्तानि सन्ति । तेषां समस्तपदानि पाठात् चित्वा लिखत- (यथा – मनसा पूतं समाचरेत् । मनःपूतम्)

प्रश्न 1

(क) विघ्नैः विहता : (कार्यात्) विरमन्ति।

हल

उत्तर: विघ्नविहता:

प्रश्न 2

(ख) वस्त्रेण पूतं जलं पिबेत् ।

हल

उत्तर: वस्त्रपूतं

प्रश्न 3

(ग) पुरुषः सिंहः इव तम् उपैति लक्ष्मीः।

हल

उत्तर: पुरुषसिंहम्

प्रश्न 4

(घ) उत्तमाः जनाः न परित्यजन्ति ।

हल

उत्तर: उत्तमजना:

प्रश्न 5

(ङ) न विवेकः परमापदां पदम्।

हल

उत्तर: अविवेक: